Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

काव्यकुसुमाञ्जलिः

14

साप्ताहिकसंस्कृतस्योपहारः

लेखकः

पं० कालीप्रसादशास्त्री

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitized by eGangotri

काशीकुमारग्रन्थमालायाः पञ्चदशपुष्पम्

काव्यकुसुमाञ्जलिः

लेखकः—

पं० कालीप्रसादशास्त्री

प्रकाशकः

श्रीसंस्कृत-कार्यालयः अयोध्या

१०००] १९४६ ई०

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

प्रकाशकः—

पं० कालीशरणत्रिपाठी,

श्रीसंस्कृत-कार्यालयः,

अयोध्या (यू० पी०)

[१०००, सन् १९४६ ई०]

मुद्रकः—

—कमलामुद्रणालयः,

अयोध्या

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

द्वित्राः शब्दाः

अहमनुभवामि यदस्माकं सर्व एव क्रियाकलापोऽसफल एवातिष्ठत्। अस्मन्मनसीयं वार्ता प्रविष्टा यद् भाषान्तरेषु यादृशमभिनवं साहित्यं प्रकाशते तादृशं संस्कृतेऽपि प्रकाशताम्। एतत्कृते प्रथमं भाषासरणिसंशोधनमावश्यकत्वेनापतितम्। एतदर्थं लोकभाषासु ये प्रचलिताः स्युः शब्दा भाषान्तराणां ते तत्स्वरूप एव ग्राह्या इति निश्चयोऽकारि। एतादृश्यामेव भाषायां संस्कृते सम्पादकीया विचारास्तिष्ठन्ति। ईदृश्या भाषया संस्कृतप्रचारोऽभूदित्यस्मद्विचारः, संस्कृतसंहारोऽभूदित्यपरेषाम्।

निश्चितायां भाषासरणौ गल्पलेखनमारब्धम्। समये २ प्रायः ७० गल्पा लिखिता अनूदिताश्च। गल्पकुसुमाञ्जलेः भागत्रये प्रकाशिता अपि, पठिता अपि परं संस्कृते गल्पप्रचारो नाभूद् यथोचितः। इत्थमत्रापि न लब्धं साफल्यम्।

संस्कृतभाषायां नासीत् प्रमाणिक इतिहासः। इतिहासलेखनात् पूर्वमावश्यकमासीदैतिहासिकसामग्रीणामेकस्थीकरणम्। एतदर्थं भागत्रये विद्वद्वृत्तं, भागत्रये विद्वत्परिचयश्चालेखि परमितिहासकारैस्तेषां पुस्तकानां स्पर्शोऽपि नाकारि। भारते जातानामायातानां प्रचलितानामप्रचलितानाञ्च धर्माणां, सम्प्रदायानामितिहासोऽपि सम्प्रदायवृत्तनाम्ना खण्डद्वये प्रकाशितः परं सोऽपि विद्वद्वृत्तं विद्वत्परिचयञ्चानुचकार। इत्थमेतत्कार्यमपि निष्फलमभूत्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

प्रकाशकः—
Tattva Heritage Foundation,Kolkata. Digitization: eGangotri
पं० कालीशरणत्रिपाठी,
श्रीसंस्कृत-कार्यालयः,
अयोध्या (यू० पी०)

[१०००, सन् १९४६ ई०]

मुद्रकः—
—कमलामुद्रणालयः,
अयोध्या
CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

द्वित्राः शब्दाः

अहमनुभवामि यदस्माकं सर्व एव क्रियाकलापोऽसफल एवातिष्ठत्। अस्मन्मनसीयं वार्ता प्रविष्टा यद् भाषान्तरेषु यादृशमभिनवं साहित्यं प्रकाशते तादृशं संस्कृतेऽपि प्रकाशताम्। एतत्कृते प्रथमं भाषासरणिसंशोधनमावश्यकत्वेनापतितम्। एतदर्थं लोकभाषासु ये प्रचलिताः स्युः शब्दा भाषान्तराणां ते तत्स्वरूप एव ग्राह्या इति निश्चयोऽकारि। एतादृश्यामेव भाषायां संस्कृते सम्पादकीया विचारास्तिष्ठन्ति। ईदृश्या भाषया संस्कृतप्रचारोऽभूदित्यस्मद्विचारः, संस्कृतसंहारोऽभूदित्यपरेषाम्।

निश्चितायां भाषासरणौ गल्पलेखनमारब्धम्। समये २ प्रायः ७० गल्पा लिखिता अनूदिताश्च। गल्पकुसुमाञ्जलेः भागत्रये प्रकाशिता अपि, पठिता अपि परं संस्कृते गल्पप्रचारो नाभूद् यथोचितः। इत्थमत्रापि न लब्धं साफल्यम्।

संस्कृतभाषायां नासीत् प्रमाणिक इतिहासः। इतिहासलेखनात् पूर्वमावश्यकमासीदैतिहासिकसामग्रीणामेकस्थीकरणम्। एतदर्थं भागत्रये विद्वद्वृत्तं, भागत्रये विद्वत्परिचयश्चालेखि परमितिहासकारैस्तेषां पुस्तकानां स्पर्शोऽपि नाकारि। भारते जातानामायातानां प्रचलितानामप्रचलितानाञ्च धर्माणां, सम्प्रदायानामितिहासोऽपि सम्प्रदायवृत्तनाम्ना खण्डद्वये प्रकाशितः परं सोऽपि विद्वद्वृत्तं विद्वत्परिचयञ्चानुचकार। इत्थमेतत्कार्यमपि निष्फलमभूत्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding by Siddhanta eGangotri Gyaan Kosha Digitization

संस्कृतकविता अपि भाषान्तरकविता इव गायकेभ्युक्ता आवश्यक्य इति विचार्य गायनार्हच्छन्दःसु समये समये प्रथिताः परामिमा अपि नाभीष्टं स्थानमापुः । इत्थमत्रापि साफल्यं न लब्धम् ।

संस्कृतपत्रग्राहकेभ्य उपहारपुस्तकमेकं दीयते, तदर्थमासां संग्रहः प्रकाश्यते । यदि काव्यकुसुमाञ्जलिनाऽल्पोऽपि क्वचिदेव पाठकानां मनोविनोदः स्यात्तर्हि सर्वं स्वपरिश्रमं सफलं गणयिष्यामीति—

संस्कृतकार्या—
लयः, अयोध्या
संस्कृताब्दः १६
श्रीकृष्णजन्माष्टमी

विदुषां वशम्बदः
पं० कालीप्रसादशास्त्री

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

❀ जय दुर्गे ❀

काव्यकुसुमाञ्जलिः

यत्पादनूपुरध्वानैः श्रुतयः श्रुतिमागताः ।
स्पन्दमानं मणिद्वीपे ध्याये दौर्गम्महोऽद्भुतम् ॥

कालीकुमारतनुजो बुधवृन्दवन्द्यः ,
फूलाङ्गजो जयति संस्कृतलोकभानुः ।
कालीप्रसादसुकविर्जगदम्बिकायाः,
पादेषु काव्यकुसुमाञ्जलिमातनोति ॥

अशनं वसनं दत्वा काश्यां भिक्षुर्दिगम्बरः ।
जायते सुजनो धन्यमस्या माहात्म्यमुत्तमम् ॥

अन्धंतमःप्रसरसंहृतदीप्तिजाला,
मुष्णन्त्यथौष्ण्यमभितो जगतीतलस्य ।
चेतोहरा प्रियविघट्टनकेलिदक्षा,
पायात्परा घनघटा जलदागमस्य ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

राजति कुञ्जवने, राधा ।
तरुण-तमाबतति-द्युति-निर्जित-सजल-जलद गगने ॥
माधव-विषमवियोग-विधुन्तुद-पीतसुधासदने ।
अनुशयलोध्रकुसुममिव लेखा तस्याः शशिवदने ॥
अतनु-तनुज्वर-जर्जरतन्वी हित्वाऽशनभवने ।
क्षयते जीवनशेषाऽतिशयं शमनसुतापवने ॥
मुक्तामुद्गिरतीव खञ्जनः, शुक्तिः कृशशयने ।
चन्द्रनयनयुगमम्बु स्रवति वा स्फटिककपोलघने ॥
आतपतप्तपयोनिधिविकला शफरीव स्वजने ।
लुठतीतस्तत एषा "श्रीकर" सक्ता गोपधने

समये परमवलम् उद्धव !
सबलं झटिति करोति निर्बलं सधनं रङ्कमलम् ॥
एकदिने मम द्वारि मुकुन्दो भैक्ष्यमटति सजलम् ।
एकदिने दानी विदेशतो वितरति योगदलम् ॥
यो माधवोऽमादयन्मुरलीनादैश्चलमचलम् ।
व्रजवनिता नु स एव शिक्षयति निष्कलमपि सकलम् ॥
प्रियब्रह्मपयाधाय समाधिं मनसि धृतं कुशलम् ।
'श्रीकर' एषस्तदपि न तुष्यति दैवज्ञो विरलम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

त्वमपि न विस्मरणीयः, मधुकर !
मधुसूदनस्य गोपवधूनां हरसि मनो रमणीयः ॥
दलित-ललित-तुरतालसमानम् ।
कलयसि पीताम्बरपरिधानम् ॥
वेणुनादमनुरणन्निकुञ्जे गुञ्जसि वरवरणीयः ॥
विहरसि वने वने वनमाली ।
नवरससञ्चयनिर्भयशाली ॥
अलिनीं स्पृशसि कमलिनीं हित्वा स्वच्छन्दाचरणीयः ॥
जयति तनुस्ते तुलिततमालम् ।
पातितविषममनोभवजालम् ॥
'श्रीकर' यन्माधवं स्मारयति कृष्णवदादरणीयः ॥

तानि दिनानि गतानि, सखि री !
येषु दिनेषु गोकुले क्रीडा गोकुलेन्दुनाऽतानि ॥
सम्प्रति वसति प्रियो मधुपुर्याम् ।
हित्वा नः ससुखं किं कुर्याम् ॥
कुञ्जातारुण्येन जितान्यपि ! राधासंस्मरणानि ॥
परजनमिव परिजनमपि मनुते ।
प्राचीनां नो प्रीतिं तनुते ॥
यमुनातटविनिवद्धप्रेमतरङ्गानि शिथिलानि

CC-0. Bhagavan Mahaveer Jain Arabhai Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation-Kolkata. Digitization: eGangotri

मनोरहितमिव मानवदेहम् ॥
शून्यं, द्रविणरहितमिव गेहम् ॥
'श्रीकर' मुरलीनादमन्तरा जीवनानि विफलानि ॥

राधिकावर ! सर्वास्त्वयि लीनाः ॥
प्रेमविवशवृन्दावनवनिता यथा पयोधौ मीनाः ॥
कुटिलनिरीक्षणविक्षतहृदयाः किंकरणीयविहीनाः ।
क्षणमपि हातुं नोत्सहामहे पदपङ्कजं प्रवीणाः ॥
कण्टकजरनभिया विपिने त्वामनुशाचन्त्यः क्षीणाः
सायं गोधूलिच्छुरितालकमीक्ष्य भवामः पीनाः ॥
तव विरहे युगमिव गणयामः पलमेकैकं दीनाः ।
हन्त ! विस्मृताः 'श्रीकर' सर्वे विषयाः सार्वजनीनाः ।

मनोमोदवहा साऽध्ययनशाला ।
निजसौन्दर्यनिशातच्छुरिकाकर्तितनिखिलजगज्जाला ।
पाठ्यतरुणतरुणीसहशिक्षणविजयदर्पोन्नतभाला ।
वर्षति यत्र सतर्षो हर्षः पीता सर्वैर्यथा हाला ॥
उद्याने भ्रमति स्वच्छन्दं गायति प्रियाऽऽदर्शताला ।
भावभावमूर्च्छनानुकलिता नृत्यति सोल्लासं बाला ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

नवनवभावसरोजाभिनयनविहितादरसुरूढिनाथा ।
चक्रमर्दनं 'श्रीकर' सुखयति कण्ठार्पितसुमनोमाला ॥

मनश्चोरस्य सखि ! मे विचित्रो नयः ।
क्रुध्यति कदा कदा च स तुष्यति न ज्ञायते मया तस्याशयः ॥
गुर्वन्तिके न पश्यति पृच्छति जातो ध्याने यथा तल्लयः ।
रहसि समेत्य कथञ्चित्कचिदपि ताड्यते प्रेम्णो महानिचयः ॥
मम हृदयस्य विदलने वीरो मम विपदां वर्द्धने निर्दयः ।
दुःखाश्रूणि विलोक्य परस्य तु पतति परापच्छिखिनि निर्भयः ॥
अयोमयो गाढप्रहणे सद्रयतो जायते तस्य जयः ।
किन्तु प्रभाते 'श्रीकर' नयनं वर्षतीव मयि शीतं पयः ॥

तव चरणे निपातामः ।
वयं वनमथ न यामः ॥
चल चलेति बहु वदसि राधिके ! कथने किन्तु त्रपामः ।
एत्य करोति कुकृत्यं किं किं स्मरसि कदापि नु श्यामः ॥
गति क्वां ननुभावामः ।
तव चरणे निपतामः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

गायति क्वियदश्लीलगायनं यत्र यत्र गच्छामः ।
मिलति झटिति सखि ! क्षिपति गुलालं श्लिष्यति हसति सकामः
वदति होलाऽस्ति स वामः ।
तव चरणे निपतामः ॥
चुनरीं हन्त ! रञ्जयन् रङ्गैः 'श्रीकर' मनोऽभिरामः ।
नीवीं स्पृशति, कञ्चुकीमञ्चति, चुम्बति मुखं,स्खलामः॥
वारणे न प्रभवामः ।
तव चरणे निपतामः ॥

आगता सैव पुनः पश्य राधिके ! होली ।
कामिनां चेतोहरा कामसाधिके ! होली ॥
सञ्जिता यासि पितुर्गेहमितस्त्वं कस्मात् ।
किन्न जानासि यदद्यास्ति माधिके ! होली॥
रञ्जितो रक्तया प्राच्यैव प्रभाते पूषा ।
राज्यते भूयः प्रातीच्या ह्यगाधिके ! होली ॥
वर्णयन्त्येके परे वादयन्ति, गायन्ति ।
कीदृशी वर्तते परिवेदनाधिके होली ॥
मानमुत्सृज्य गले तस्य बिलग्ना "श्रीकर"
हन्त ! हरिणोच्यते धन्याऽस्त्यवाधिके होली ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

स्मर शुक ! पञ्जरबन्धनहेतुम् ।
कलितहरितवसनां स्वशुकीमिव धरणीमाशु समेतुम् ।
नवनिर्मितनीडे नु गायनं स्मरसि न शुचमपनेतुम् ॥
स्मरसि नभसि धृतशालिमञ्जरीविरचितसुरपतिकेतुम् ।
स्वच्छन्दभ्रमणं सखिभिः सह तृणफलपयो विचेतुम् ॥
'श्रीकर' भाषां भजसि परस्य स्वयमेवेतिं क्रेतुम् ।
भीतिविमञ्जनभावनया भज भगवन्तं भवसेतुम् ॥

प्राच्याः स्मेराननमवलोकय ।
ओ कुरङ्ग ! सुप्तोऽसि मृगेन्द्रस्थल्यामात्मानं नय ।
वनजा विरुदावलिं वदिष्यन्त्यधुना वननृप ! जय जय ॥
कुमत उलूक ! क्रीडसि हा ! हा !! कोटरमधुनैव श्रय ।
श्येनः खेलत्यत्र तदाघातात् स्वमाशु विनिवारय ॥
अज ! पत्राकृष्टस्त्वमिहेतो व्रज कथनं मे पालय ।
वसति गुहायामस्यां भीष्मो वृकराजो बत निर्भय ! ॥
विसृज कमलिनीं 'श्रीकर' शीघ्रं मा रे ! कालं यापय ।
एति गजो जलमन्थनलीलो मधुकर ! गतयमसंचय ! ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Hari Foundation. Digitization: eGangotri

ओ वरपथिक ! स्मर पन्थानम् ।
अन्धनिशायां सुप्तो हित्वा निजकर्तव्यज्ञानम् ।
आशु जहीहि मोहनिद्रामथ व्रज रे ! चिन्त्यं स्थानम् ॥
मा नय समयमन्तिके कृत्वाऽशुभशुभग्रन्थ्याधानम् ।
मार्गे षड्रिपुकन्याचौरा यात्यस्तं हरियानम् ।
मध्ये मायानटी स्वतन्त्रा हन्त ! जिघृक्षति दानम् ।
मुक्तः कोऽपि न विवशो भूत्वा लभते दुःखमसानम् ॥
आस्त्वमेकमपि नो सञ्चितवान् मित्रं सौख्यनिदानम् ।
'श्रीकर' जय दुर्गे ! कथयन्निति सम्प्राप्नुहि सन्तानम् ॥

पङ्कज ! हन्त !! हससि रे ! पङ्कम् ।
जातो येन भृतस्त्रातो वा क्रीडसि सुखं यदङ्कम् ।
मूढमते ! तं नीचं गणयसि कलयसि शिरसि कलङ्कम् ॥
बकवराहवृषभा न जजक्षुर्मत्वा यस्याताङ्कम् ।
सेव्यतेऽद्य मधुपाङ्गना त्वया यस्य बलान्निःशङ्कम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri

एति यदुपमानं हरिनेत्रं हृदयं सतामवङ्कम् ।
भ्रान्तोधुना न पश्यसि 'श्रीकर' गिरिषु पतन्तं टङ्कम्॥

मधुकर ! याति दिनं न समानम्
उदयमुपैति प्रभाते सविता सायं लभते हानम् ।
कोकातमुर्हसति यदि सम्प्रति भवति न किं तन्म्लानम् ॥
प्राप्य वसन्तं पिकः प्रहृष्टो गायति कलरवगानम् ।
भीष्मग्रीष्मताडितस्त्यजति तत् सर्वं सौख्यनिदानम् ॥
विषयलोलुपो यदपि कमलिनीगर्भं गतो वितानम् ।
'श्रीकर' भज भगवन्तं मुक्तिं प्राप्स्यसि मा त्यज मानम् ॥

मम मानसं वलाद् हृतं हे नन्ददुलारे ।
सर्वस्वमात्मसात्कृतं हे नन्ददुलारे ॥
मुरलीरवेण कीलितं गोपाल ! गोकुलम् ।
पदमेकमपि न संसृतं हे नन्ददुलारे ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

यमुना विलोक्य तावकीं मुग्धा त्रिभङ्गिकाम् ।
स्खलनं गतौ समाभृतं हे नन्ददुलारे ॥

साचीकृतेन राधिका नयनेन ताडिता ।
तद्ज्ञानमाशु विस्मृतं हे नन्ददुलारे ॥

हैयङ्गवीनचोरमणे ! प्रेमिणां कुलम् ।
स्वद्दर्शनेप्यनादृतं हे नन्ददुलारे ॥

स्थातुं वयं न शक्नुमो धैर्यं हि 'श्रीकर' ।
अवलोक्यतां कियद् धृतं हे नन्ददुलारे ॥

शक्यते वक्तुं न किञ्चिद् भारतीयैर्भारते ।
कीदृशैः क्रान्ता मुरारे ! नारकीयैर्भारते ॥

नीयते कालोन्नहीनैर्मानवीयैर्भारते ।
पीडितैः परतन्त्रतायां दानवीयैर्भारते ॥

बन्धुवर्गैर्बन्धुवर्गो बाध्यते बहुधाबुधैः ।
धार्यते गोवंश एषो हास्मदीयैर्भारते ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

उपकृताः के के तया नो पालिताः सम्मानिताः ।
देववाणी पीड्यते दुःशासनीयैर्भारते ॥
धर्मरक्षा स्यात् कथं 'श्रीकर' न जानीमो वयम् ॥
पाहि परमार्तान् प्रभोस्मान् पश्चिमीयैर्भारते ॥

कोकिल ! कलयसि किं परितापम् ।
मूढ ! जहासि नश्वरे लोके कुतः कोमलालापम् ॥
अन्तं याति वसन्तो यच्छन् हन्त ! शुचामभिशापम् ।
किन्तु सखे ! भूयः किमुदेष्यति दूरीकृत्य न पापम् ॥
स्वर्णमये कालस्य पञ्जरे बद्धो व्रज निर्वापम् ।
मौनं मा मोत्सृजोच्यते रे ! कर्णे जापं जापम् ॥
परभाषाग्रहणं न विदध्या बन्धनमूलकलापम् ।
'श्रीकर' सुखमपि प्राप्य दुरापं दृष्ट्वोत्थितमपि चापम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation. Digitized by eGangotri

राधिकाजाने ! त्वमायाहि भारतं भूयः ।
चिन्तयंस्त्वामयं जीवत्यनारतं भूयः ॥

तदेव वृन्दावनं गोकुलं तदेव प्रियम् ।
सैव बरसाना तथा सैव ते मथुराऽपि इयम् ।
स एव गोपीगणस्तामलं दधाति धियम् ।
त्वया विहीनः परन्त्वथ याति कां न द्रियम् ॥

विलोकयन् स्थितः शैलस्तवागतं भूयः ।
राधिकाजाने ! त्वमायाहि भारतं भूयः ॥

भक्तरक्षायै त्वया यत्र प्रतिज्ञा त्यक्ता ।
धर्मरक्षायै अभूर्यत्र नु गीतावक्ता ॥
मण्डली यत्र जनानां च वर्तते रक्ता ।
हन्त ! त्वय्येव वह्नेः कालतः प्राणैः सक्ता ॥

तमेव दुर्ग्रहैर्ग्रस्तं समाहृतं भूयः ।
राधिकाजाने ! त्वमायाहि भारतं भूयः ॥

यस्य सत्पुष्टिकरं वै पयस्त्वया पीतम् ।
यस्य तक्रं दधि ग्लस्तं घृतं च नवनीतम् ॥
यस्य गुणगीतमलं प्रेमतो नित्यं गीतम् ।
अद्य गोवृन्दमहो मन्यते जनैर्वीतम् ॥

एहि गोविन्द ! तदालोकतां नत भूयः ।
राधिकाजाने ! त्वमायाहि भारतं भूयः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

शासितो येन कदाचित् समस्तसंसारः ।
वेगवान् यश्च मनुष्यैर्बभूव दुर्वारः ॥
येन पद्भ्यां समुत्तीर्णः परोऽप्यकूपारः ।
यस्य धर्मेण कृतो लोकतमःसंहारः ॥
यस्य सम्मानमग्नं सर्वसम्मतं भूयः ।
राधिकाजाने ! त्वमायाहि भारतं भूयः ॥

दानवैर्यत्र सुराणां गणः समुद्भ्रान्तः ।
राक्षसैर्यत्र नराणां गणः समाक्रान्तः ॥
पापिभिर्यत्र वराणां गणः परिश्रान्तः ।
दुर्जनैर्यत्र परं पूरितः प्रान्तः प्रान्तः ॥
पापपरितापाकुलं हन्त साम्प्रतं भूयः ।
राधिकाजाने ! त्वमायाहि भारतं भूयः ।

अधस्तथोर्ध्वं भवतो त्रिवेगतिं,
कालक्रमञ्चञ्चलचेतसो दशाम् ।
प्रख्यापयन्ती भ्रमसि प्रति क्षणं,
दोले ! वहन्ती स्वजने समानताम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

वारय यशोदे ! मातः ।
परमचपलस्तव तातः ।
यमुनानीरमुपैति ग्रहीतुं यत्र सखीसंघातः ।
कस्तस्तरस्तत्र वनमाली सालिः सायं प्रातः ॥
याति नाशितघटव्रातः ।
वारय यशोदे मातः ॥
गृहमुपेत्य प्रत्यहं निवृत्तो दधिभक्षणक्रियातः ।
यद्वनाचरति न वक्ष्ये सीदाम्यहं स्वयं लज्जातः ॥
साहसी परमो नातः ।
वारय यशोदे मातः ॥
हरिदर्शनागतानां गोपीनामिति प्रेमकथातः ।
गता हसन्ती जननी स्वगृहं कृष्णस्तत्रायातः ॥
श्रीकरो हास्यो जातः ।
वारय यशोदे मातः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

यमुनापुलिने क्रीडति श्यामो होलायाम् ।
इतो याति राधा सखिभिः सह
तत आयाति सबलरामो होलायाम् ॥

मञ्जीरासहनादसहितः,
जयति डक्कानां रावो महितः ।
ढक्को गर्जति दिक्षु प्रहितः,
घोषयतीव जयं कामः, होलायाम्
यमुनापुलिने क्रीडति श्यामो होलायाम्

सुन्दरकरधृतसाभ्रगुलालः,
कुङ्कुमकेशररञ्जितभालः ।
युवतिजनैः सहितो गोपालः,
जयसि जयति राधे श्यामो, होलायाम्
यमुनापुलिने क्रीडति श्यामो होलायाम्

पीतवसनधारी वनमाली
राधायाः शाटी हरताली

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

चलति द्वयोस्तुल्या पिचकाली
वर्णत्यानन्दग्रामः होलायाम्
यमुनापुलिने क्रीडति श्यामो होलायाम्

गोप्यो गोपाः पुनरायाताः,
रच्यन्ते रङ्गानां घाताः ।
'श्रीकर' गायन्त्यपरे व्राताः,
जायतेऽद्य कामो वामः, होलायाम्
यमुनापुलिने क्रीडति श्यामो होलायाम्

आक्रम्यते कदाचिद्राधा,
तत्र तयाऽपि दीयते बाधा ।
प्रेम्णस्तटिनी वहत्यगाधा
जातो यथा जगद्भ्रामः, होलायाम्
यमुना पुलिने क्रीडति श्यामो होलायाम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

भारतगीतिः ।

शुभ्रहिमालयरत्नजटितमुकुटे धौताब्धिसमुद्रे !
जनितसुरासुरनरकिन्नरगन्धर्वस्वभूहरिरुद्रे !
उपवनवनगिरिगह्वरनिर्झरसरितासिन्धुविशाले !
सकलजनाकर्षकषड्ऋतुरमणीतयोन्नतभाले !

सिक्खपारसीजैनमुसल्मानैः सुसेवितेऽमन्दे ।
बौद्धे साईहिन्दुभिश्च चरणं धरित्रि ! ते वन्दे ॥
चत्वारिंशकोटिजनगीते ! जय जय भारतमातः !
भ्राता सखा त्वमेव धनं विद्या मे माता तातः ।

दिग्विस्तृतसद्यशोराशिरुच्यन्वीकृतरिपुलोके !
विपुलसुविद्यावैभववितरणहृतहृदयाम्बुजशोके !!
अमरवाणि ! रिपुकुलदमने कृतकरभीषणकरवाले !
मातर्दुर्गे ! चण्डि ! कालि ! जय मुण्डविमण्डितभाले !

न्यायभ्यस्तव गुणगणजलधेरन्तं यान्ति न सुधियः,
प्रकृतिमनोहरतायाः पारं यन्ति कदा सुरपुर्यः ॥
अतुलितविभवे हृतविभवा जनयसि विभवं कमनीयम् ।
"मा भैषी." कथयन् स्वसुतान् प्रददास्यभयं शमनीयम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

त्वज्ज्ञानस्य महाजलधेः कणिकामपि प्राप्य विमूढाः ।
ज्ञानिवरं स्वं स्वीकुर्वन्त्यपरिष्कृतभावनिगूढाः ॥
त्वत्करुणामधिगत्य त्यजन्ति स्वदेशमहो ! न कियन्तः ।
अत्रत्या इव तेऽपि भजन्ति सुखं भयहीनाः सन्तः ॥

उच्छिष्टं तव भुक्त्वा सर्वे देशा वै कृतकृत्याः ।
शिष्यैः सम्प्रति तृणीकृत्य गुरवश्च कृता इव भृत्याः ॥
हन्त ! अनार्या असुरप्रायाः स्वं श्रेष्ठं मन्यन्ते ।
अत्रत्यास्तेऽसभ्यजनेषु विशेषतया गण्यन्ते ॥

ते कृषका रचयन्त्यधुनापि जगद्भरणं किमसत्यम् ।
अन्यहिताय सुतैश्च महासमरे न कृतं किमकृत्यम् ॥
अतुलितविभवपराक्रमशालिनि ! भारतजननि ! विबुद्धा ।
किमतो दुःखकरं भविता पश्यामि सदुःखामद्धा ॥

हृतवस्त्रा जीर्णा शीर्णा त्वमभूर्यद्यतिदीना ।
किन्तु शुचं त्यज मातः ! सम्प्रति तव सा दशा विलीना ॥
पश्य पश्य ते मोहनकृपया दिवसाः पुनरायाताः ।
"श्रीकर" पूजितकमलपदे ! ते सुताः प्रबुद्धा जाताः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

कदा द्रक्ष्याम्यहं तं नन्दबालम्

अजो नित्योऽविनाशीशो य उक्तः ।
त्रिभिर्मायागुणैः सगुणोऽपि मुक्तः ॥
यदानन्दः सुभक्तैर्भूरिभुक्तः ।
सदा संरक्षणे जगतां च युक्तः ॥

जनाः कथयन्त्यलं यं कालकालम् ॥
कदा द्रक्ष्याम्यहं तं नन्दबालम् ॥

शिरसि मुकुटं, करे लकुटं वहन्तम् ।
वने शीतोष्णवर्षाऽधं सहन्तम् ॥
विपन्मूलञ्च मित्राणां दहन्तम् ।
कुमार्गे गामिनां सङ्गं रहन्तम् ॥

अपीत्यं स्तारयन्तं रासजालम् ।
कदा द्रक्ष्याम्यहं तं नन्दबालम् ॥

करे गोवर्धनं दधता नवेन ।
परित्रातं न किं गोकुलमनेन ॥
ज्वलद्वनवह्निमापिबता च केन ।
डिम्भा रक्षिता गावो जनेन ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

अङ्गेमुण्डेषु नृत्यद्दत्तालम् ।
कदा द्रक्ष्याम्यहं तं नन्दबालम् ॥

धराया दुःखगेहध्वंसनाय ।
विपज्जालं स्वपित्रोर्दंशनाय ॥
कुरूणां दुःस्वभावभ्रंशनाय ।
अघं वा पाण्डवानां स्रंसनाय ॥

मनुष्योऽभूद् दयालुर्धेनुपालम् ।
कदा द्रक्ष्याम्यहं तं नन्दबालम् ॥

मनोज्ञः कोऽपि लोके नैव यस्मात् ।
वदान्यः कोऽपि शोके नैव तस्मात् ॥
भवाब्धेस्तारकस्त्वपरो न ह्यस्मात् ।
सदिच्छा पूर्तिमागा जीव ! कस्मात् ॥

लसत्पीताम्बरं वनमालमालम् ।
कदा द्रक्ष्याम्यहं तं नन्दबालम् ॥

विधाता यस्य श्रेयः पूतनायाः ।
चकोरश्चन्द्रिकाया राधिकायाः ॥
द्विषास्त्राणत्वरो द्रुपदात्मजायाः ।
तटे क्रीडापरः कालिन्दिकायाः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

प्रमत्तासक्तगोपीजनविशालम् ।
कदा द्रक्ष्याम्यहं तं नन्दबालम् ॥

सुदाम्नो रक्षताविनिवारकेऽस्मिन् ।
त्रिपथगात्मज-प्रतिज्ञा-पारकेऽस्मिन् ॥
हितं विजयस्य नित्यं कारकेऽस्मिन् ।
खलानां दुष्कृतां संहारकेऽस्मिन् ॥

मनो रमतां हरौ, यादवभरालम्।
कदा द्रक्ष्याम्यहं तं नन्दबालम् ॥

खलानां सज्जनानां सद्गते हे !
प्रभो गोविन्द वर गीतारते हे !
मुरारे गोपते गोपीपते हे !
महामायामते हे मामते हे !

वदन्नेवं नयन् काले करालम् ।
कदा द्रक्ष्याम्यहं तं नन्दबालम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

वृन्दावने विहारिन् गीताप्रचारकारिन्

त्राणाय यस्य भगवन् ! विहिताः स्वथा प्रतिज्ञाः ।
जानन्ति भारतीया अथापि याः सुविज्ञाः ॥
तस्या विनाशनेऽलं जाता जना विधिज्ञाः ।
सत्कर्मभिर्विहीना नीचास्तथानभिज्ञाः ॥
धर्मं सनातनं तं त्रायस्व पापहारिन् ।
वृन्दावने विहारिन् गीताप्रचारकारिन् ॥

व्यक्ता वसन्त्यनेके तव पादयोः सुपृक्ताः ।
गुणकीर्तने मनुष्या जातस्पृहा अशक्ताः ॥
कथने यदा यदाख्ये बद्धादराश्च भक्ताः ।
अथापि यत्र पूर्णाः श्रद्धालवोऽनुरक्ताः ॥
देशः स ते विपन्नस्तस्यापदां विदारिन् ।
वृन्दावने विहारिन् गीताप्रचारकारिन् ॥

यत्रावहन्नु नभः पयसां पुरा मुरारे ।
यानान्युर्जलानामम्भोनिधावपारे ॥
ज्ञाने परे विमुग्धाः सर्वेऽपि यस्य सारे ।
सम्मानितश्च लोको निखिलै रणप्रचारे ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

देशः स कारित भूमन्नवलोक्यतामधारिन् ।
बृन्दावने विहारिन् गीताप्रचारकारिन् ॥

यत्र प्रतापप्रतिमा निजताभिमानिनो वै ।
वीराः शिवासामाना हिन्दुत्वज्ञानिनो वै ॥
भामानिभाः स्वदेशाद्यादर्शदानिनो वै ।
शंकरसमर्थतुल्याः शतधाऽवधानिनो वै ॥
जाताः पुनर्न याताः त्वत्वस्य हे प्रसारिन् ।
बृन्दावने विहारिन् गीताप्रचारकारिन् ।

हरतीह याज्ञसेन्या दुःशासनोऽथ वासः ।
दुर्योधनेन धर्मोपरि चाल्यतेऽथ पाशः ॥
शकुनिच्छलेन जातो भीमादिबलविनाशः ।
सम्प्राप्यतेऽथ घोरः सन्मानवैश्च त्रासः ॥
गोविन्द पाहि कस्ये त्वरयैव पादचारिन् ।
बृन्दावने विहारिन् गीताप्रचारकारिन् ॥

अभिमानिना हृता ते सा रावणेन सीता
पारेसमुद्रबलिना रुदती प्रसह्य नीता ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

त्रायस्व तां, मनुष्यैर्वन्द्या सदैव गीता
परमापदां पदं या सम्प्राप्य भूरिभीता ॥
द्वीभित्तित्राणकारिन् खरदूषणादिमारिन्।
वृन्दावने विहारिन् गीताप्रचारकारिन् ॥

चैतन्यमाप्य भूयो जाड्यं परं निवारय।
विपदामलं बलं हे विपदां हरे! विदारय ॥
भवसिन्धुतो निमग्नानस्मांश्च नाथ! तारय।
धैर्यं पुनः प्रचारय धर्मं पुनश्च धारय ॥
आयाहि दानवारिन्नायाहि पापतारिन्।
वृन्दावने विहारिन् गीताप्रचारकारिन् ॥

आकर्णनीय एषो विनयः पुनः पुनर्मे।
गोपीपते! प्रदेयो विजयः पुनः पुनर्मे ॥
दूरं सदैव नेयो विभयः पुनः पुनर्मे।
वितराशु मङ्गलानां निधयः पुनः पुनर्मे ॥
केवलकनिष्ठिकायां गोवर्धनाद्रिधारिन्।
वृन्दावने विहारिन् गीताप्रचारकारिन् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

राधागीतिः ।

कोमलकलितकलेवरनलिनीमलिनीकृतकलरागा ।
वासितवसुधातलसितसरसिजवसनवसानविभागा ॥
[illegible]रुचन्द्रिकाचञ्चलचलदलचपलचमत्कृतचित्ता ।
[illegible]मणीमणिरिव राधेयं मणिधरमिलननिमित्ता ॥ १ ॥

इन्दीवरवरेन्दिराचन्दिरजलधरमन्दिरभासम् ।
अतसीकुसुमकलेवरकेशवकमनच्छविकृतहासम् ।
धीरसमीरतरलतरानीरं घारघोषगम्भीरम् ।
नीरमुपैतुमुपेता भास्वद्भास्करतनयातीरम् ॥२॥

मञ्जुलवञ्जुलपुञ्जनिकुञ्जागुञ्जद्भ्रमदलिललितम् ।
चञ्चच्चपलचञ्चलोदञ्चत्कुवलयकेशरकलितम्
कञ्जलजलमवलोक्य हरिस्मृतिजनितमनोभवबाधा ।
वरवंशीरवमिव मधुमधुरं वदति वचनमिति राधा ॥

तरणितरुणतनये ! तव तीरेऽतुल्येक्रीडति श्यामः ।
नीलनलिनकोमलकिसलयकमनीयकान्तिजितकामः ।
सरससरोरुहसीमितषट्पदगायनगर्वितगीते
गोपालीतालीगतिशालि वनमालीतोऽभीते ॥ ४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

गोवर्द्धनगिरिगुह्यगुहाशुगवीजनविहितविभङ्गे ।
ललितलवङ्गलतालिलास्यलवनृत्त्यत्तरलतरङ्गे ! ॥
धीरधुरन्धरविधुतधैर्य्यमधुकरमधुरध्वनिभारम् ।
गानमिदं तव वक्ति परं हरिदर्शनमाहितभारम् ॥ ५ ॥

दूर्वादीर्घदर्पदलनद्युतिदेहप्रदीप्तदिगन्ते ।
माधवमनोमोदमदमुदिरावयवान्ते विजयन्ते ॥
चाञ्चल्यं नवनयनशफरयोर्नाभौ विवृतावर्तः ।
सङ्घटनं कूलोरुयुगमयोः कुककुचयोरानतः ॥ ६ ॥

नीलनभोवसनं शुचितारकरत्नखचितमयि धृत्वा ।
कृष्णचन्द्रमभिसरसि निशेवाञ्जाननवरणं कृत्वा ॥
तद्भवभावभराभिभूतभवदनुभवभूषितभूते ।
चञ्चरीकचेतो हि चलत्यचिरञ्चमत्कृते चूते ॥ ७ ॥

माधवमिलनमहोत्सवमेदुरमञ्जुलमन्दिरमस्तो ।
नो जानासि मनागपि निम्नोन्नतप्रस्खलनं यत्ते ॥
वैवस्वतसहोदरे क्रियतां मा तन्मयतात्याग ।
किन्तु स्वजनवर्गावलोकनेच्युचितो नैव विरागः ॥८॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

कूजत्कोकिलकुलकाकलिकाकलकालिन्दीकूले ।
सज्जित, शीतल, सुन्दर, सुरभित, सुखकर, सुरतरुमूले ॥
सह कृष्णेन चरन्ती बान्धवविहितप्रेमागाधा ।
भानुसुते ! वृषभानुसुताऽहं नौमि सखी ते राधा ॥ ९ ॥

एकाकिनी कदम्बतरुतले हरिणाऽमले निषण्णा ।
कतिधा नु प्रार्थिता मानिता नो जानासि विषण्णा ॥
ललितत्रिभङ्गनटं नृत्यन्तं गायन्तं मम गानम् ।
तं न स्मरसि मुखरयन्तं मुरलीं मोचयितुं मानम् ॥१०॥

नन्दतनयपरिरम्भणमुदिता वेत्सि न वै परकरम् ।
अनुभूत हि मया यद् दुःखं तन्न त्वया सखि ! दृष्टम् ॥
नातस्तिष्ठसि किञ्चिदपि प्रियमिलनमार्गसंलग्ना ।
अवलोक्यतां किन्तु राधा तद्विरहमनोरथभग्ना ॥११॥

एकदिने जलखेलनिरमनां मामन्वेष्टुं कृष्णः ।
निरनो, बनमालयाऽर्चितस्ते रभसा स्मरसि सतृष्णः
बनमालीत्यभिहितस्ततो मां व्याजहार, यमुनेयम् ।
राधे ! सखिषु ममाभ्यर्थनाथा स्थानममुष्यै देयम् ॥१२॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

आश्चर्यं तव वीक्ष्य कार्ष्ण्यं निम्नोन्नतप्रस्खलनम् ।
त्वं कृष्णेनैकदा विसृष्टा प्राप कष्टसङ्कलनम् ॥
उक्तो मया रहसि, यमुनायां प्रियतम ! कृपा विधेया ।
त्वामाश्लिष्य जहौ मामेषा कृतज्ञता नो हेया ॥ १३ ॥

मोन्मत्ता भव शृणु मदीरितं जहि यमुने ! चापल्यम् ।
कौटिल्यं त्यजनीयं तावद् भजनीयं सारल्यम् ॥
गाम्भीर्यं बिभर्ति वरविभवे व्रजति न झटिति विकारम्
उदयति तत्तेजः पुनरस्तं मान्यं वारम्वारम् ॥१४॥

त्यक्ता येन रसालमञ्जरी मधुपरागपरिपूर्णा ।
तेन कुटजकलिका न भविष्यति किं मधुपेन विचूर्णा ॥
स्थितिसंस्थापनकरः स्वभावः हर्तव्यो न कदाचित् ।
विश्वासः सखि ! शठभुजङ्गमे कर्तव्यो न कदाचित् ॥१५॥

आसीदाशीर्वादप्रदानोत्सवो यशोदागेहे ।
गोवर्धनगिर्युद्धृतिरचितो यस्मिन् मघवा देहे ॥
तत्राऽऽहूता भृशम्मानिता तदन्तिकेऽहं नीता ।
ललिताऽऽकृष्टमनोयदुपतिना नाऽऽलोकिताऽविगीता१६

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

एकदिने वनभोजनाय यमुनेऽनिमन्त्रितोऽस्माभिः ।
गोपालैः सहितो गोपालो गोपाङ्गनाभिर्गभि ॥
मामवलोक्य सस्मितोऽवोचत सकटाक्षं मे ललिते ।
राधाया इव दधिनि न स्पृहा भवति तवाऽऽम्लाकलिते ॥१७॥

एवमेव गृह्णात्येकामपरां विसृज्य वनमाली ।
किन्तु धन्यया त्वया सेव्यते सखि ! सदैव सुखशाली ॥
दृष्ट्वा पुनर्दिगङ्के लीनं नो कुप्यति नलिनीनम् ।
त्वपिति च विकसति मुखमावृत्याञ्चलेऽश्रु बद्ध्वा दीनम्

याहि याहि यदुपतिसेवायै भव सुभागिनी बाले !
भ्रातरि तव मम सन्देशः प्राप्नुयात् कथञ्चित् काले ॥
अथ भूतले वसितुमिच्छति न प्राप्तविरहबहुबाधा ।
कृष्णसमेता भूत्वा सम्प्रत्येकाकिनीव राधा ॥१९॥

युमणिघर्मविकलामिव सहसाऽऽगत्य कृतश्चित् कोकाम् ।
राकापतिरिव गोपीपतिरङ्के तां दधौ सशोकाम् ॥
जयजयेतिरवमुच्चैर्दधती यमुना गता सतृष्णे ।
चल रे चञ्चलचित्त ! त्वमपि "श्रीकर" राधाकृष्णे । २०

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

भ्रमरगीतिः ।

प्रकृतिनिशीथध्वन्यनुकुर्वत्तारस्तम्भध्वानम् ,
जयति मनोजविबद्धनपटुतरमधुकरमधुभरगानम् ।
यदाकर्ण्य चेतः स्मरतीहितमुरलीमधुरविरावम् ,
गगनवदिन्दीवरश्यामलं कृष्णं महानुभावम् ॥

विभ्रन् सर्षपसुमनोमालं दलितकलितहरतालम् ,
पीताम्बरपरिधानं जनयसि मनसि यशोदाबालम् ।
मधुप ! विलोक्य धूम्रवर्णं त्वां नवकुसुमेषु सतृष्णम् ,
कालिन्दीपुलिनेषु भ्रमन्तं भावयामि बत ! कृष्णम् ॥

पतसि पादयोर्मधुरं कर्णे श्रव्यं गायसि गीतम् ,
दक्षिणखलमशकैस्तुल्यस्त्वं स्वं दर्शयसि विनीतम् ।
कालिन्दीकलकूलकुञ्जगतराधामीक्ष्य विदग्धाम् ,
सहसाऽऽगत्य कुतश्चिन्मधुकर—कृष्ण ! जनय मा श्रद्धाम् ॥

नलिनी यथा दिदृक्षति दोषाकरेरितम् ध्वान्तम् ,
त्वामपि मधुप ! वञ्चिता राधा कृष्णदूतमायान्तम् ॥
कृष्णतारिका कृष्णनिमग्ना कृष्णं पश्यति लोकम् ,
ज्ञानमपनयति प्रीतिञ्जनयति नयति पुनर्हृदि शोकम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

मां मानयितुमेव यदि मधुकरकृष्ण ! त्वमिहायातः,
अपनय तावन्नलिन्यर्पितां पीतमालिकां प्रातः।
अलमभवत् खण्डिता मानिनी केशरलता कदाचित्,
किन्तु सपत्नीपीड़ितस्य ते न पुरो नता कदाचित् ॥

स्थलकमलिन्यां नवलनलिन्यां मञ्जुमालतीकुञ्जे,
गुञ्जितवान् कतिधा न मधुकरस्त्वं शेफालीपुञ्जे।
त्वया प्रार्थिता किन्तु मानिता चारुविकचिता चम्पा;
मिलनक्षणोत्सुकस्य तेऽभवद्वायुनापि धृतकम्पा ॥

किन्त्वधिगत्य नन्दसुतदौत्यं प्राप्तस्त्वमसि समीपे,
जनयितुमिच्छसि कुसुममकाले हन्त !! मधुपवर !! नीपे।
प्रियकरोऽसि मेऽतस्ते स्वागतमाचरामि हृदि खिन्ना,
आकर्णय व्यथां, भव स्थिरो, दुःखैः शतधा भिन्ना ॥

एकदिने हरये प्रारब्धं पत्रलेखनं सायम्,
सर्वा निशा व्यतीता मधुकर ! कृष्णं गायं गायम्।
तदुपरि तल्लिखितं पठामि प्रियप्रेरितमिव साश्चर्यं,
प्राणेश्वरि ! राधे !! त्वे प्राप्त्यै क्रियते कामसपर्या ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Digitized by Tattva Heritage Foundation. Digitization: eGangotri

एकदिने जातो महोत्सवः कालियमन्थनजन्यः,
कृष्णगतप्राणैर्व्रजवासिभिरभितो रचितो धन्यः ।
अहिशिरस्सु नृत्यन्तं कृष्णं स्मृत्वाऽहं हतशक्तिः,
जयति मदीये नयने भाले कुङ्कुमकज्जलभक्तिः ॥

यदुपतितनयमेकदा दिनकरतनयातीरे दृष्ट्वा,
व्यथिताया राधाया अग्रे गुञ्जसि निर्दय ! दृष्ट्वा ।
प्रखरनिदाघज्वालादग्धा कल्पलतेयं ललिता,
कृष्णमधुप ! नो मर्दनयोग्या झटिति भविष्यति दलिता ॥

मत्तोऽसि पङ्कज ! विकाशमवाप्य नूनं,
स्वस्नैग्ध्य-रूपरस-गन्ध-सुरम्यतायां ।
त्रातोऽसि येन मदमत्तगजाजगोभ्यः,
पङ्कस्त्वया कथमुपेक्षित ऊर्ध्वदृष्ट्या ॥

हा ! हा ! पद्म ! वृथैव पल्वलजले जातोऽसि वद्धादरः
भेकाजावकगोवराहमहिषीपंकैः परं वेष्टिते ।
ते भृङ्गा मधुमानमत्तमुखरा हंसा गुणग्राहिणः ।
खन्ति कात्र सुगन्धशुद्धपयसाकिष्टास्तथा वायवः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

बलीयसीच्छा ममास्ति दुर्गे ! त्वमेकदोत्तिष्ठ भारताय।
सतां जनानां हिताय मातर्विपद्वलानां विदारणाय ॥
यदा यदैष्यत्यरिप्रवाधा तदा तदैष्यामि भीर्न कार्या ।
स्मर प्रतिज्ञां स्वकां त्वरस्व प्रपीडितानां प्रपालनाय।
तिरस्कृतो ब्राह्मणोऽद्य धर्मः प्रपीडितो गौश्च साधुवर्गः।
सुधारकैः संस्कृतानभिज्ञैः स्वदेशसंस्कारनाशनाय ॥
त्वया हता आततायिनोघप्रदायिनो भूरिमायिनो ये ।
त एव भूयस्तुदन्ति तेषां पुनः समायाहि वारणाय ॥
गृहं मदीयं परैर्विनिघ्नीकृतं क्व गच्छेम कोस्ति त्राता ?
त्वमेह्यधोगच्छतां नृणां श्रीकरावलम्बाय लालनाय ॥
वन्दे भारतवर्षमुदारम्
वेदकुरानबाइबिलजेन्दावस्ताविदिताकारम् ।
राममहम्मदयीशूजरथुस्त्राहितधर्माचारम् ॥
हिन्दुमुसल्मेंसाइपरसीकानां परमागारम् ।
विविधसम्प्रदायाकुलितानां मुक्तिमुक्तिसद्द्वारम् ॥
निराकारसाकारनिरीश्वरवादिबृन्दपरिवारम् ।
संस्कृतफारस्यंग्रेजीजेन्दाभाषाभरधारम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitized by Siddhanta eGangotri

मन्दिरमस्जदगिरिजाग्यरीपूजाफलदात्मरम् ॥
कृष्णारक्तश्वेतपीतांगैः 'श्रीकर' चेतोहारम् ॥

अल्पया प्रशंसयाऽधुनातनो महाजनो यो,
हं हो ! तोषमेति न तथैव त्वां विचिन्तये ।
दत्त्वा सुदामानं दानिवर्यं मन्यसे स्वं प्रभो !
दृष्टो भारतः किं गतो गर्तं रङ्कतामये ॥
कृष्णायाः सुलज्जां परिपाल्य त्वं कुशासनाच्चेत्,
गर्वितो त्रिवस्त्रास्तद्गिन्योऽसंख्यका अये !
'श्रीकर' मुरारे! पाहि कृष्ण! कृष्णानां वा कथं,
दुर्गतिं न पश्यसि गतिन्नतु जगन्नये ॥

आर्यादशकम्

नववटकिसलयसघनच्छायायां व्याजसुप्तमज्ञात्वा ।
तन्मुखवीक्षणसमये प्रतारितोत्फुल्लनयनाभ्याम् ॥
ग्रीष्मर्तुमध्याह्नः खट्वानाच्छादिता च वटभूजम् ।
प्रियतमकरकरकशिपुश्चेतस्यद्यापि खेदमातनुते ॥
वर्षति मघवति कूजत्यहिभुजि वाते तते च तमसि ।
स्मृत्वा भुजंगं कुड्यां प्रकम्पते चेत्रपालीयम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

आधिं लिलिखिषति स्वं लिखति परं प्रियतमस्य सा राधा।
एहि वदत्यनुवारं, राधे ! राधे !! च तद्भावा ॥
नीडे तिष्ठ स्वीये, चातक ! चालय न चञ्चलञ्चेतः।
एति घनश्यामोऽसौ, गगने धीरध्वनिं तन्वन् ॥
शालितृणं दुर्व्यस्तं, श्वसुरो दृष्ट्वा भृशं कुपितः
हन्तुमियेष, मृगाक्षी, विसिष्मिये देवरं गूढम् ॥
ध्वान्ते रहसि निलीना, सहसैकं कागजं समधिगत्य,
दीपं विना मृगाक्षी, प्रियवृत्तं वाचयति विज्ञा ॥
सखि ! मे व्यथा नितम्बोरःकचनयनेषु भाविनी काचित्
उपचितिमेषु च कलयद्धृदयं नैर्घृण्यमनुभवति ॥
क्षेत्रे जनको, जननी मातुलगेहे च तामसी रात्रिः,
गोष्ठे नन्दज ! भीता क्रियतां गोदोहने सख्यम्
परधनपरदारमतिः कुनतिः कथमीश ! प्राप्नुयां सुगतिम्
लक्ष्मीपतिरेव गतिः पतितानां मेगुणस्यस्य ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

प्रार्थना ।

दयामय ! भारतीयानां दशा भूयः समन्नेया ।
पतन्ती भाग्यकैलाशादधोधे नाऽधुना हेया ॥
विदेशीयैरपि प्राप्तः प्रशंसां यस्त्वदाकारः ।
सनातनधर्म एषः क्षीयते दृष्टिः प्रभो ! देया ॥
त्वया गोपाल यासां वर्द्धनं विहितं नु मधुपुर्य्याम् ।
क्षतिस्तत्रैव तासामेव धेनूनामहोऽमेया ॥
भवद्वाणी कदाचिद् वेदभाषा लोकभाषाऽभूत्
मृता सेत्युच्यते यैः सत्वरं तेषां ततिर्जेया ॥
त्वदीया वर्णमर्यादाऽधुना हाऽऽच्छिद्यते 'श्रीकर'
परित्राणाय तस्या आगतिस्ते किं पुनर्ज्ञेया ॥

कविगीः

हसन्ति कुप्यन्ति रुदन्ति मोदं,
यान्ति प्रहृष्यन्ति भवन्ति मत्ताः
श्रुत्वैव यां हन्त ! समस्तलोका,
जीयात् कवीनां सुमनोहरा गीः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Vivek Foundation,Kolkata. Digitization: eGangotri

उर्मिला

उर्मिला—काव्यं लिखति मे लेखनी,
बन्धचरणे ! शारदेऽनुज्ञायताम् ।
कामये कठिनेऽपि चेतसि निर्मला,
भक्तिगङ्गा करुणसरसा जायताम् ॥

लिपिङ्केऽङ्कय शुचौ हृत्प्राङ्गणे मे,
पात्रञ्चारुचित्रञ्चोर्मिलायाः ।
चरित्रं संस्मृतं पतिदेवतायाः,
सुमित्रं किं भविष्यति नोर्मिलायाः ॥

समाच्छन्ना विवाहे पीतवस्त्रैः,
समानीता सखीभिः पुत्तली या ।
प्रदत्ता श्रूयते सौमित्रयेऽलम्
महाकाव्यस्मृताऽऽसीदुर्मिला सा ॥

इयं का वत्स ! पृष्टः सीतायाऽसौ,
यदभिधानं न सौमित्रिश्चकार ।
चरित्रं रामभद्रस्योर्मिलां तां
न चित्रेभ्यो वहिष्कर्तुं ससार ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

इयं जनकतनया श्रुतकीर्तिरेषा,
सपत्निका मण्डवीयं याति दृष्टौ।
विलुप्ता दीर्घरघुवंशे, विनीता—
पुनर्नैवोर्मिला हा! काव्यसृष्टौ॥

पुराणैरेव किं वेदैर्न बोध्या,
इयं सा पावनी पुण्याऽस्त्ययोध्या।
इयं जन्मस्थली सूर्यान्वयानां,
इहैवेतोर्मिला कठिने! विशोध्या॥

परं शान्तं जनैः स्वल्पैः समेतम्,
निनादैर्नादितं कलकारिकानाम्।
सजनि! अवलोक्यतां गृहमुर्मिलायाः,
विरावैर्वासितं शुकसारिकानाम्॥

अयं सोपानमार्गो रत्नजटितः,
अपीच्योऽयं प्रकोष्ठश्चोर्मिलायाः।
इयं सीताऽनुजास्त्याराध्यपादा,
इमाः सख्यः पराः पतिदेवतायाः॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Hem... Kolkata. Digitization: eGangotri

पङ्कलिप्ता पद्मिनीयं पद्मिनीभिः किमाकीर्णा,
निष्प्रभाभिस्तारिकाभिश्चन्द्रिका कल्ये विशीर्णा।
शुचि विदूना सह बताभिर्वर्तते विपिनस्थली किम्,
सालिकेयं पञ्जरे बद्धोर्मिला वा शुकी जीर्णा॥

पद्ममणिमन्दिरकृतायां नीलमणिमयवेदिकायाम्,
स्वच्छशय्यायां निषण्णा दुग्धतोऽप्यभितोऽधिकायाम्।
उर्मिला संक्रान्तमूर्त्या सरस्विजातुल्या त्रिवेण्याम्,
ख्यापयन्ती स्वत्वमप्रतिहतमलं सखियूथिकायाम्॥

सङ्कुचितमेकं चरणमथ प्रोन्नतं वामं वहन्ती,
[illegible]स्य तत्र करं द्वितीयं दक्षिणं तदुपरि रहन्ती।
हन्त! सव्यकपोलमाधायात्र चिंतायां निमग्ना,
निर्निमेषोर्मिला विरहव्याकुला पीडां सहन्ती॥

एकवस्त्रा धूलिधूसरिताल्पकाल्पाभूषणा सा,
किन्नरी पतिताऽमरी वा स्वर्गतो गतदूषणा सा।
खञ्जरीटान् कमलिनी वा शुक्तिका मुक्तावलीर्वा,
उर्मिलाऽश्रूण्युत्सृजाति हा! हंत!! व्यपगतभूषणा सा॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

यज्ञतस्याहूतसुरपतिसहचरी किं पीतवदना,
किं रतिः प्रद्युम्नदर्शनकाङ्क्षिणीयं दग्धमदना ।
कोकिला ऋतुराजहीना, कुमुदिनी शशिवञ्चिता किम,
उर्मिला दमयन्तिका शफराङ्गना वा त्यक्तसदना ॥

ओ नलिनि ! खिन्ना तुषारैर्दृश्यताम्,
समयरथमारुह्य रविरयमागतः
यस्य संसप्तकविजयिनः स्वागतम्,
ताम्रचूडोऽग्रे चरत्यभिमानतः ॥

दुन्दुभिध्वानैर्न हा ! निद्रा गता,
मोहमायेयं सजनि ! ते कीदृशी ।
श्रूयते वार्ता वयस्याया न मे,
उर्मिले ! त्वं कठिनहृदया हीदृशी ॥

उर्मिले ! पीडां मनस्याधाय ते,
स्वर्गमुपयातोऽतिखिन्नो भूपतिः ।
यौवने राज्येऽपि शोकार्तो भृशं,
किन्न वेत्सि बभूव हा ! भरतो यतिः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

न स्मरसि विज्ञाय रुदतीं त्वां नृपः,
भूमिशय्यामाश्रितो यद् व्याजहार ।
को लतां प्रस्रवक्षणां हेम्नस्ततां,
छेत्तुमिह मत्तोऽपरो भूमौ ससार ॥

कीदृशी पीता सजनि ! कादम्बरी,
मेघमालेवातिगाढा जायते ।
शारदीं शोभामलञ्चेतोहरां,
द्रष्टुमुत्का चातकी ते नाऽयते ॥

ओ तटिनि ! स्वच्छन्दता ते पर्वतैः,
हन्त ! कालप्रेरितै रुद्धा परम् ।
दूरदेशागतदिद्दुभिराततं,
किन्तु मन्येऽत्रैव वैलीन्यं वरम् ॥

सितसरोजे ! शोकमुत्सृज चपलता,
दिनपतेर्दूरंगतेवाऽऽलक्ष्यते ।
स्तारयन्न मोदं जगत्यामेत्यहो,
शीतकिरणः कैर्निरोद्धुं शक्यते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Digitization: eGangotri

सखि सुलक्षणे ! यद्यपि कथनं तव साध्यमहं मन्ये हृदये ।
जानामि न कर्तव्यं त्वमहो मम धैर्यं जयत्यधैर्यमये ! ॥
तेजसि तमसो विजयो दृष्टः सत्येऽप्यसत्यतायाः शतधा,
महताञ्च कदाचिद्विनिपातः क्षुद्रैः प्रकीर्त्यते लोकनये ॥

पतिचरणकमलसेवानन्यां भगिनीं सीतां धन्यां मन्ये ।
ज्येष्ठो मम यत्नमश्रित्यारिगणान् परमान् जितवान् जन्ये
कमलिन्या रसमापीय पपी राक्षसान्नयति कीनाशपुरम् ,
सिंहिनीसहचरः केशरवान् कथ्यते वने मृगराड् धन्ये ।

कीदृशी व्यथा नो जाने मे निद्रापि यत्र जाता व्यथिता,
बन्धूनां सेवां नाचरती साकेतेऽलं निन्द्या कथिता ।
माण्डवी तथा श्रुतकीर्तिरियं पुरजनपरिजनपूजानिरते,
आकाशकुसुममालेवाहं सर्वेषामाशायै प्रथिता ॥

न स्थास्यन्तीमान्यपि दिनानि दुःखावहान सखि जानेऽहम्
पश्यामि कुमुदिनीमनुवारं निरतां शशिनः सम्मानेऽहम् ।
निद्रातुरैव नलिनीव सजनि ! प्रियतमागमावधि का चिन्ता,
तद्दर्शनाय चक्राकारा विकला न स्नाने, पानेऽहम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

एकं सखि ! दुःखकारणं मे तद्वार्ताप्येका नैव श्रुता,
आकृतिस्तदीया पूर्णैः स्वैर्नेत्रैर्नो दृष्टा हास्ययुता ।
सङ्कोचलालितं तच्चरणं हृदयेन दूयता नाश्लिष्टम,
नीचैर्द्रष्टुं नुदतिस्म यथा साकारा मामयि ! तत्प्रभुता ॥

मिलनार्थमेकदा सोपानेष्वागच्छतिस्म मे प्राणप्रियः,
स्वागतोन्मुखीं मामभिनिरीक्ष्य सम्प्रापुस्तस्मिन् परा ह्रियः ।
उर्मिलागृहे चित्रावलोकनार्थं हेवत्स ! प्रस्थितः किम,
सहसाऽनुगयोक्तो जानक्या सखि ! जाता वयमिव चित्रभिः

प्रियतमस्य मयि निद्रालस्यं तेनैव प्रेरितं समागतम्,
मम स्वस्य चोपकारार्थमालि ! सद्वृत्तं सर्वं समाहृतम् ।
कमठीकमठौ दूरतो न किं भावादानप्रदानचतुरौ,
नातोऽस्मि सदोषा कथनमिदं स्वयमेव ज्ञेयस्याशु ततम् ॥

एतद् दुःखं बाधते विपिनगमनचरणवार्ता नैव कृता ।
कथितम्न कदाचिद्रहसि प्रिय ! भवताऽहमपि स्यामेव स्मृता ।
श्रीसीतारामचरणकमले जायतां मधुपभावश्च मनः,
कामादिकषड्रिपुभिर्वृत्तिर्भावत्की स्याम्न कदापि हृता ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

अश्रूणाम्भवति रोदनं यन्निस्तब्धनिशायामेकान्तम् ,
सौमित्रे, सीते,रामेति व्याप्नोति रवः प्रान्तं प्रान्तम् ॥
शयनाशनरहिता भरततपश्चर्या शत्रुघ्नमनः खिन्नम् ,
हृदयं, शतधा न भिनत्ति कथं मम सुलक्षणे ताप्तं श्रान्तम्

रेखाङ्कितभित्तिरियं व्यनक्ति पूर्ज्यैस्त्यक्तं त्रिभिरथ वनम् ।
वामाङ्गं स्फुरति मदीयमतो जानामि समीप इव स्वजनम् ॥
सखि सुलक्षणे ! श्रूयतामिदं साकेतवासिनां सद्वचनम् ।
अधुनैव जायते पुष्पकतः प्रियसीतारामसमागमनम् ॥

नन्ददुलारे

मम मानसं बलाद् हृतं हे नन्ददुलारे !
सर्वस्वमात्मसात् कृतं हे नन्ददुलारे !
मुरली—रवेण कीलितं गोपाल ! गोकुलम,
पदमेकमपि न संसृतं हे नन्ददुलारे !

यमुना विलोक्य तावकीं मुग्धा त्रिभङ्गिकाम् ,
स्खलनं गतौ समाश्रितं हे नन्ददुलारे !
साचीकृतेन राधिका नयनेन ताडिता,
तद्—ज्ञानमाशु विस्मृतं हे नन्ददुलारे !

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation. Digitization: eGangotri

हैयङ्गवीनचोरमणे ! प्रेमिणां कुलम् ,
त्वद्—दर्शनेऽप्यनादृतं हे नन्ददुलारे !
धर्तुं वयं न शक्नुमो धैर्य्यं हि "श्रीकर"
अवलोक्यतां कियद् धृतं हे नन्ददुलारे !

शुक !!

नारायणस्य तनयः शुकदेवनामा
नामावलम्ब्य शुक ! यस्य बभूव धन्यः ।
यः श्वेतनीलहरितारुणपीतकान्तिः
क्रीडन्नभस्यनुकरोति महेन्द्रचापम् ॥

घूका यथा शुक ! भवन्ति नु यत्र मूकाः
श्रीरामनामकथने बहुवावदूकाः ।
तत्रैव ते सुकृतिनोऽनुदिनं प्रवृत्ति—
र्वन्द्यश्चिरन्तनमुनिर्भुवि धन्यजन्मा ॥

यो ब्रह्मवादनिरतः शुचिसारिकाभिः,
कीर्तिं ततान नितरां बुधमण्डनस्य ।
श्रीशांकरे स्मयमलं निचखान चित्ते
कादम्बरीप्रथितदीर्घयशाः शुकोऽसि ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

नीतोऽशनाय तव कोटरतो बहिस्त्वं
काकैः सुपक्षरहितो मनुजैर्धरद्भिः।
हा! तान् विहाय सहसैव भजस्यनन्तं
किं ब्रह्मविच्छुक! वदोत कृतघ्नमूर्तिः॥

भाषामलं समवलम्ब्य परस्य बद्धः।
हा! पञ्जरेऽनुदिनशोककरेऽप्यभय्याम्॥
सम्बोधितः प्रकृतिवारिभिरहो सुहृद्भिः,
तान्नो जहात्ययि शुकादपरः क नीचः?

स्वच्छं जलं पिबसि खादसि पुष्टभक्ष्यम्
भृत्यैर्वृतो वससि हेमगृहे तथैकः।
हित्वा गणान् परगणान् गणयस्यगण्यः
धिक् त्वां पुनर्धिगिति ते शुक! दास्यवृत्तिम्

श्रीचैतन्यदेवः

भजनविरलमुक्ताभाश्रुसिक्तोत्तरीयः,
हिमगिरिविशदाङ्गो हृष्टरोमप्रवल्लिः।
गगनविततबाहुः स्विन्नगात्रोऽर्वदद्भि-
र्जयति विदितकीर्तिः कोऽपि चैतन्यदेवः॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation. Digitization: eGangotri

वर्षा

दग्धोऽसि यद्यपि निदाघप्रचण्डवन्हौ,
सत्यागहच्युतिमरे ! न कदाप्युपेयाः ॥
शान्तिं नयन् समुपयाति नवीननीर-
गम्भीरमन्थरस्वः पिक ! नीरदोऽयम् ॥

आयासि चेज्जलद ! शोभानमानं ते,
आयाहि सेचय वनं शनकैः शनैस्त्वम् ॥
मार्तण्डचण्डकिरणैः कवलीकृतं न-
त्वेत् पतिष्यति महाजलधारयाशु ॥

प्राप्ते प्रशस्तसमये रिपवोऽपि मैत्रीं,
कुर्वन्ति तथ्यमिति नात्र विचारणीयम् ॥
ये वायवः खरतरा व्यथका निदाघे,
ते वान्ति नीरसमये विविधाः सुखाय ॥

स्रोतो विना लयमुपैति नदोऽपि दीर्घः,
संक्षीयमाणरविरत्र महत्प्रमाणम् ॥
उद्योगिनं जलधरं च विलोक्य पौनः-
पुन्येन लज्जित इवास्तमितो विवस्वान् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

सन्मानखाद्यरहिता अपि दुष्टवर्या,
एधन्त एव न विचित्रमिदं कुराज्ये ॥
ग्रीष्मे प्रशासति भुवं किल कण्टकानां
वृद्धिर्यतो नयनमार्गमवश्यमेति ॥

योत्याचरत्यनुदिनं न सुखाय यस्य,
कर्माणि कान्यपि भवन्ति मनुष्यलोके ॥
सद्यः स वै व्रजति दुर्जन एव नाम·
निःशेषतामघकरश्च यथा हि तापः ॥

द्वारं पिधाय सखि ! तिष्ठ गृहे स एव,
वायुः समेति जलदागमसूचकोयम् ॥
निःस्वापमश्रुपतनं तनुकम्पनं च,
प्राप्तं मयास्य कृपयातुरया भयेन ॥

रमानाथः शेते श्वसुरभवने क्षीरजलधौ
विदेशं मे कान्तस्त्यजति न धनार्थी गतघृणः॥
स्वदुःखं कस्याग्रे जलदजनितं यामि गदितुम्
ऋतावस्मिन् प्राणान् सखि!नु मम कस्तास्यति वरः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri

तारा

कृष्णाम्बरैः परिवृता पितृसूर्यगेहात् ।
तेजांसि तस्य गिरती प्रकृतिः प्रियाय ॥
प्रायात्यलङ्करणतां त्वमुपेत्य तस्याः ।
तारे ! तदोज्ज्वलतनुर्भवसीह धन्या ॥

क्षीणं कटाक्षविशिखैर्द्युमणिं नलिन्या-
ऽऽकृष्टं विलोक्य भवने पिहितं कपाटैः ॥
कृष्णाभिसारपरया निशयाऽम्बरेभि-
न्नभ्रूणि सन्ति खचितान्युततारिकास्ताः ॥

कम्पत्करैः कुमुदिनीं मृदयन्तमीक्ष्य ।
तारे ! शशाङ्कमयि दुःखमगा न किञ्चित् ॥
दृष्ट्वा स्वजीवनधनं परयाऽभिकृष्टं ।
धन्यैव जातु रमणी विकृतिं न याति ॥

वज्री यदेन्दुमनुधावति गर्जनाढ्य-
स्तारास्तदा घनगृहे निभृता भवन्ति ॥
आजीवनं सुखमपारमितं नु यस्मात् ॥
प्रायस्तमेव विकलं रहयन्ति नार्यः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

गेहं गते सुरगुरौ सुरनायकस्य ।
तारे ! समेत्य शशिनं सहधर्मवद्धा ।
उत्पाथ सौम्यसुतमन्धतमिस्रमीषद् ।
याता ह्रियं न विबुधेषु कलङ्किनी ही ॥

सुग्रीवराहुपरिपीडितवालिचन्द्र —
मालोक्य दुःखत्रिकला न मनागभूस्त्वम् ॥
तारे ! नवं तृणमिवापरमीप्सती गौ —
र्वैधव्यनाशनपटीयसि धिक् पुनर्धिक्

मृगेन्द्र

यैः केशरैर्घनविदीर्णकरैः मृगेन्द्र ।
हतो मजैणवृषभेषु भयं तनोषि ।
तानाखुवैव कणशो विहितानजानन् ।
शेषे विवेकरहितः पतनोन्मुखो हि ॥

ते स ध्वनिर्घनविघट्टकेलिदक्षो ।
हा ! हा ! मृगेन्द्र ! सहसा क गता न जाने ॥
सर्पा दरीं करिवरा वदरीं प्रयाताः ।
प्राप्ता प्रधानपदवीं भवता च येन ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitization: Bangotri

यत्रागता गजवराः सहसा भियैव ।
प्राणान् जहुश्च परया त्वरया मृगेन्द्र ॥
हन्ति तत्र विभयाः शशकाः शृगालाः ।
यातो विचिन्त्यपदवीं त्वयि शौर्यनाथे ॥

कं वा श्रयिष्यति न वेद्मि वनस्थली यं
नाथं विधाय विधुरा त्वयि बद्धभावा ।
मोक्ष्यन्ति तां हरिणनायक ! किं शृगालाः
लङ्घ्वा प्रसह्य पदवीञ्च दवीयसीं ते ॥

जातोऽसि वृद्धिमगमश्च मृगेन्द्र ! यत्र ।
तां मातृभूमिमधुना समुपेक्षसे किम् ॥
लाङ्गूलचालनमधश्चरणावपातं ।
किं श्वेव सर्वहरणस्य पुरः करोषि ॥

उत्तिष्ठ जागृहि सदेव बलं गृहाण ।
कोडीकृताः करिवराः सहसैव येन ॥
नीचैश्च हन्त ! हसितावसिता मृगेन्द्र !
त्वामेव जीवति चिरात्तव मातृभूमिः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

हंस !

सान्द्रीकृते पयसि पद्मपरागपुञ्जै,
गुञ्जन्मधुव्रतगणैः स्फटिकावभासे,
नीतानि यस्य दिवसानि मनोहराणि,
बद्धोऽद्य किं स्मरसि हंस ! न मानसं तत् ॥

भेकाकुले महिषशूकरमर्दितेऽस्मिन्,
हा ! हन्त !! पल्वलजले क्षपयन् दिनानि ॥
दौर्भाग्यदण्डपरिपीडितराजहंस !
जीवन् कथं बकसहायमुपाकरोषि ॥

किं शुक्तयः कटुहिता इव सूक्तयस्त्वां,
प्राप्स्यन्ति भेकशरफरीभरिते तडागे
भ्रान्तोऽसि हंस ! न मिलन्ति बराटिकासु,
मुक्ताः पयोधिसुलभा नृपतिप्रियास्ताः ॥

उत्तिष्ठ जागृहि तदेव वनं प्रयाहि,
नीतानि यत्र समधीभिरहानि तानि ।
नो चेत् पलाशनपरा मनुजा विहङ्गा
नेष्यन्ति कीर्तिवपुषा विकलं मराल ! ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

गम्भीरनीरघनघर्घरघोषमेघा,
यावन्नवाम्बरपथातिथयो भवन्ति ।
तावद्विधिप्रखरकोपकरालक्षो
रे हंस ! यापय दिनान्यशुभान्यमूनि ॥

वैकल्यम्

मनो जहाति न मे हन्त ! घनश्यामोयम्
जने जने च सखि ! श्रूयते सकामोयम् ॥
अहो ! समेतमिदानीं नु कीदृशं कुदिनम् ।
यतोऽभ्युदेति मदीयाक्षिवरेष्वम्बुदिनम् ।
मन्यते यत्र भवेत्तस्य दर्शनं सुदिनम् ।
कलिन्द—नन्दिनीकूले, वने, गृहेऽनुदिनम् ।
यदेत्य वक्ति शनैरुच्यते न वामोऽयम् ॥
मनो जहाति न मे हन्त ! घनश्यामोऽयम् ॥
नृपात्मजोऽस्ति न जानाति भयं याति कुतः ।
भयप्रदर्शनेऽलञ्जायते कोपेन धुतः ॥
यथाग्निराहुतः क्षण एव विनीतोऽपि नुतः ॥
वार्यते नाऽऽलि ! मयाऽनिच्छयापि नन्दसुतः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

वारितोऽभ्येति विवादाय सबलरामोयम्
मनो जहाति न मे हन्त ! घनश्यामोयम् ॥

प्रकृष्टप्रेमपयःपूरपूरितासेकाः ,
पदे पदेत्र व्र जे सन्ति वधूव्योनेकाः ।
तदी यकीर्तिततिख्यापने यथा भेकाः ।
कुलव्रतं न नमन्त्यासु काश्चिदप्येकाः ॥

किन्तु मामेव समन्वेति जगद्भ्रामोयम् ॥
मनो जहाति न मे हन्त ! घनश्यामोयम् ॥

कृपाकटाक्षसमुद्रेस्मि तस्य मग्नाहम् ॥
वितर्कयन्ति जना मां यदद्य नग्नाहम् ॥
अथातिप्रेम्णि भविष्यामि भृशं भग्नाहम् ॥
ततोपि दूरनिवासाय कार्यलग्नाहम् ॥

नृत्यतीवैत्य पुरः किन्तु सवनदामोयम् ॥
मनो जहाति न मे हन्त ! घनश्यामोयम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

भगवन् !

अर्थ—नयनेन न ते यो जनो दृष्टो भगवन् !
सृष्ट्वा सृष्टोऽपि यथाऽसृष्टो विनष्टो भगवन् !!
पाण्डवो दृष्टो यदाऽनेन हास्तिने नगरे,
शात्रवं सिन्धुमथोत्तीर्य प्रहृष्टो भगवन् !
किं सुदाम्नाऽपि परं दैन्यमुपेतो नाऽहम्,
ओमनापृष्टोऽप्यनैश्वर्यविकृष्टो भगवन् ।
राधिकाऽनेन विना दुःखिनी वृन्दारण्ये,
किं क्षणेनाऽस्याः परो गर्वो न भ्रष्टो भगवन् ।
कञ्चुकुङ्मेन विलोक्योऽस्ति भारतः 'श्रीकर' !
यः कदाचारैर्यथा चन्द्रमो घृष्टो भगवन् ॥

आनन्दवृन्दावनम्

भक्तिर्भागवतस्य माधसुकृतेः श्लिष्टाश्चयस्ते गुणाः ।
पाण्डित्यं किल वैय्यटस्य सकलं तन्मम्मटाभूषणम् ॥
अस्मिन्नेव समाप्यतेऽतिविशदा वाणस्य गद्यच्छटा ।
चम्पौ 'श्रीकर' कर्णपूरसुकवेरानन्दवृन्दावने ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri

अन्योक्तयः

वपुषा च सुवासेन सुन्दरेणोपलक्षिता ।
केतकि ! त्वं विशोच्यासि भ्रमरैः स्पर्शिता न यत् ॥
शीघ्रतां कुरु मा पान्थ ! भविष्यसि द्रुतं द्रुतः ।
क्षीयन्ते पथिका एव न पन्थानः कदाचन ॥
अलं ते क्रीडयोलूक ! रात्रौ रचितयाऽनया ।
पश्य द्विजवरारावैर्जातः सूर्योदयः पुनः ॥
परवाचं गृहीत्वैव बन्धनं प्राप्तवानसि ।
इदानीं पञ्जरस्थोऽपि शुक ! तां न विमुञ्चसि ॥
परिवर्तिनि संसारे परिवर्तनमेव जीवनं भूतेः ।
सुप्रभातसूर्योदययोः पश्चाद्यत् सहस्रांशुः ॥
रे जड कौशिक ! लीलां स्वीयां संहर हितोक्तिरेषा मे
ध्वान्तं निवारयन्तं पश्यायान्तं त्वमालोकम् ॥

जयन्तबन्धो ! न कुरुष्व शोकं, हसन्ति वर्गा यदि कोकिलानाम्
प्रायो भवन्त्येव परैर्भृता हि, दुष्टा विमूढा मलिना मनुष्याः ॥
रे ध्वांक्ष ! मा गर्वमुरीकुरुष्व, सम्प्राप्य भुक्त्वा च बलिं घृणार्हम्
सर्वे वदिष्यन्ति सहास्यमित्थं, स्वल्पेन नीचास्तु भवन्ति मत्ताः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

भारतगीतम्

इममवलोकय भारतदेशम् ।
जन्मभुवं ह्यवलम्बितक्लेशम् ॥

तेहि गता दिवसा नो भगवन् ! तच्च गतं विनिवेशम् ।
ताश्च गता धीह्रीश्रीर्विद्याः केवलमितं सुवेशम् ॥

इममवलोकय भारतदेशम् ॥ १ ॥

सम्प्रति नृत्यति प्रत्यागारं दुर्भिक्षता विशेषम् ।
यान्ति जनता यमदेवमुखे परिहृत्य वयोन्यवशेषम् ।

इममवलोकय भारतदेशम् ॥ २ ॥

दुःखमितोऽप्यधिकं भविता किं कोऽपि न याति परेशम् ।
सत्कुर्वन्ति प्रजां न नृपा न प्रजाश्च तथैव नरेशम् ॥

इममवलोकय भारतदेशम् ॥ ३ ॥

दैन्यं भ्रमति करेण जनानामाकृष्यात्र नु केशम्
"श्रीकर" यद् गतमस्ति तदेव गतं परिपालय शेषम् ॥

इममवलोकय भारतदेशम् ॥ ४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

गीतिः

भुवनेश ! भारतेऽस्मिन् भव्या दया विधेया ।
दृष्टिः कदापि कोपादरुणा नहि प्रदेया ॥
अद्धा न तेऽत्र श्रद्धा वद्धादरेऽधुनाऽस्मिन् ।
भूमिर्हि भारतीयैरधिगम्यते न ध्येया ॥
आर्ता रुदन्त्यसख्या ज्वलनेन जाठरेण ।
अधुनाऽपि रङ्कता किं देशस्य नानुमेया ॥
आच्छादनैर्विहीना लज्जाकुला पतन्ती ।
गर्ते विलज्जतायाः कृष्णापि कृष्ण ! हेया ? ॥
यस्याः सुधाम्बुद्रैः क्लिन्ना वसुन्धराऽभूत् ।
सा धेनुरत्र 'श्रीकर' हा ! हन्यतेऽविगेया ॥

विवशता ।

शक्यते वक्तुं न किञ्चिद् भारतीयैर्भारते ।
कीदृशैः क्रान्ता मुरारे नारकीयैर्भारते ॥
नीयते कालोऽन्नहीनैर्मानवीयैर्भारते ।
पीडितैः परतन्त्रतायां दानवीयैर्भारते ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

बन्धुवर्गैर्बन्धुवर्गो बाध्यते बहुधाऽबुधैः ।
घात्यते गोवंश एषो ह्याऽस्मदीयैर्भारते ।

उपाकृता. के के तया नो पालिताः सम्मानिताः
देववाणी पीड्यते दुःशासनीयैर्भारते ॥

धर्मरक्षा स्यात् कथं "श्रीकर"न जानीमो वयम् ।
प हि परमार्तान् प्रभोऽस्मान् पश्यिमोयैर्भारते ॥

करुणेश

करुणापरेषु करुणेश ! करुणा ते नास्ति,
कथमन्यथाऽत्र करुणारुणा यथा मृताः ।
दीनानाथ ! दीनबन्धुता ते कुत्र विद्यते सा,
भवसिन्धुमग्ना यथा दुःखिताः समुद्धृताः ॥

'श्रीकर' विरक्ताः कुतः सर्वानुरक्तिं वै गताः,
अबला अनेका व्यभिचारिभिः कुतो हृताः,
वर्णाश्रमाचाराः क्षीणाः सभ्यताभिमानिभिः किं
स्वेच्छाचारिभिः किं धर्ममार्गा बहवः कृताः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

आत्मगीतम्

अपि संस्कृत भाषोद्धारकरम् ।
क्रियतामयि श्रीकर ! कर्म वरम् ॥

पतितं किल भारतवर्षमहो, न च शान्तिमुपैति सतर्षमहो ।
कुर्वन्ति परे संघर्षमहो, न हरन्ति जना विपदां प्रसरम् ॥

अपि संस्कृतभाषोद्धारकरम् ।
क्रियतामयि श्रीकर ! कर्म वरम् ॥

इटली, जापान, बृटेनजनैः अमरीका, जर्मन, फ्रांसतनैः ।
निजभाषागौरवलब्धधनैः ज्ञातं विहितं किं शीघ्रतरम् ॥

अपि संस्कृतभाषोद्धारकरम् ।
क्रियतामयि श्रीकर ! कर्म वरम्

आन्ध्रः, पञ्जाबो, नेपालः यू० पी०: सी० पी० र्वा बङ्गालः ।
वर्माऽत्र बम्बई, सन्थालः, राजस्थानं जागर्ति परम् ॥

अपि संस्कृतभाषोद्धारकरम् ।
क्रियतामयि श्रीकर ! कर्म वरम्

वर्णाश्रमधर्मो ह्रासमितः, पाश्चात्यप्रभायाऽऽसमितः ।
तुर्कश्च सतर्को ग्रासमितः, जापानः प्रसरति, दैन्यहरम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

अपि संस्कृतभाषोद्धारकरम् ।
क्रियतामयि श्रीकर ! कर्म वरम् ॥

यावन्न भवेद् भाषोद्धारः, तावन्न भवेद्राष्ट्रोद्धारः ।
कथमपि न भवेद् धर्मोद्धारः निजसंस्कृतिरक्षणदक्षमरम् ॥

अपि संस्कृतभाषोद्धारकरम् ।
क्रियतामयि श्रीकर ! कर्म वरम् ॥

नाथ !

कदा सज्जनोद्धारको नाथ ! भूयाः ।
विपद्वारिधेस्तारको नाथ ! भूयाः ॥

हृता भूमिजा रावणेन प्रसह्य ।
कदा तस्य संहारको नाथ ! भूयाः ॥

सुदुःशासनार्ता विवस्त्राथ कृष्णा ।
कदागत्य तद्वारको नाथ ! भूयाः ॥

म्रियस्तेऽपमानं गतो भारतो हा !
कदा तस्य सत्कारको नाथ ! भूयाः ॥

परस्परमिहत्या द्विषस्यथ 'श्रीकर' ! ।
कदा शान्तिसञ्चारको नाथ ! भूयाः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

शनैः शनैः

हे राम ! भारतोऽधुना दमितः शनैः शनैः ।
अवलोकयाशु दुर्दशाङ्कमितः शनैः शनैः ॥
साखण्डलं भूमण्डलं नमतिस्म यद्भ्रे ।
हा ! हन्त !! विदेशीयकैर्नमितः शनैः शनैः ॥
यत्तेजसाऽपसारितं हृद्ध्वान्तमर्बुदैः ।
गर्वः स एव हैन्दवः शमितः शनैः शनैः ॥
हीनोऽपि गुणैरीश्वरो यस्मिन्नवातरत् ।
देशः स तेऽपवर्गदो यमित शनैः शनैः ॥
रेमेत्र रमा, भारती 'श्रीकर' सदा बभौ ।
भविता कदाऽथ ते पदा रमितः शनैः शनैः ॥

दण्डसप्तकम्

शास्त्रदण्डं करे धृत्वा वेदो जगति दुर्जनान् ।
दण्डहीना न शोभन्ते ब्राह्मणो जगतीतले ॥

जग्रन्थ यद्वृत्तमलं महर्षिः,
स राघवः केन न वन्दनीयः ।
परं परं कारणमस्ति [illegible]
तस्य प्रचण्ड मथितोमद[illegible]...

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

न कृष्णहस्तो यदि चाक्रदण्डो –
भविष्यदेषो न रिपूनजेष्यन् ।
जयं विना तस्य कथां पुराणे,
न भारते व्यासवरोऽलिखिष्यत्

न दण्डहीनः स्थितिमाप युद्धो,
वीरोऽपि नो विश्रुतिमाससाद ।
दण्डान्वितः शङ्कर एव सद्यो,
बभूव भूमौ प्रथितश्चिराय ॥

विसृज्य भूपा निजखड्गदण्डान्,
यदा बभूवुर्विषयेषु लग्नाः ।
तदैव माहस्मदीर्घदण्डा,
जयं समीयुः शुचि भारतेऽस्मिन् ॥

विलासमग्नेष्वथ तेष्वभूवन् ,
गृहीतदण्डा जयिनोऽत्र हूणाः ।
ततोऽभवत्पूर्णतयाऽस्वतन्त्रं,
विपत्पदं भारतवर्षमेतत्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

धर्मे समाजे निगमागमागमेऽद्या—
चारे प्रजायां नृपतौ गुरौ च ।
उच्छृङ्खलत्वं प्रसृतं पृथिव्या-
मित्यत्र दण्डाय परावकाशः

विरहनिवेदनम्

आ भज मौनमुदारम्, राधे !
त्वत्संस्मरणजनितविरहानलहुतमधुसूदनसारम् ।
स्मरति श्वसिति, क्लिश्यति, प्रलपति, रोमाञ्चति कृतसीत्कारम्
स्निह्यति, हसति, विमुह्यति, गायति, वहति मनोभवभारम्
तव प्रतिकृतिमालिख्य स्वहृदये मुदमधिगत्यापारम्
विविधमनोभावैरभ्यर्चति मीलितलोचनतारम् ।
आगमनं तव पश्यति दिशि दिशि त्यक्त्वा लोकाचारम्
वदति शनैरुच्चैर्वा राधे राधे इत्यनुवारम्
अवलोकय चल सखि ! प्रियतममप्यपगतसकलविहारम्
सफलय 'श्रीकर' जीवनमङ्गीकुरु गोवर्धनधारम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri

होली ।

आगता सैव पुनः पश्य राधिके ! होली ।
कामिनाञ्चे तोहरा कामसाधिके !! होली ॥

सज्जिता यासि पितुर्गेहमितस्त्वङ्कस्मात् ?
किन्न जानासि यदद्यास्ति माधिके ! होली

रञ्जितो रङ्गया प्राच्यैव प्रभाते पूषा ।
रज्यते भूयः प्रतीच्या ह्यगाधिके ! होली ॥

वर्णयन्त्येके परे वादयन्ति, गायन्ति ।
कीदृशी वर्तते परिवेदनाधिके होली ॥

मानमुत्सृज्य गले तस्य विलग्ना "श्रीकर"
हन्त ! हरिणोच्यते धन्यास्त्यवाधिके ! होली

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

होली !

मा मा मुञ्च मुरारे
रङ्गमङ्गे सुकुमारे ।
नटवर ! त्वं न विभेषि मनागपि परलज्जापटहारे ।
जारदोषदूषिता कथमहञ्चलिष्यामि संसारे ॥
गोपगोपीगणभारे ॥
मा मा मुञ्च मुरारे ॥ १ ॥

रङ्गरञ्जितां चुनरीमेतां धृत्वा कथमागारे ।
यास्याम्याशु विचारय मोहन ! शीलसुरभिसञ्चारे ॥
दुर्वधूपिहितद्वारे
मा मा मुञ्च मुरारे ॥ २ ॥

यमुनाजलमानेतुं प्रहिता श्वश्र्वा सर्पाकारे ।
मार्गे "श्रीकर" होलावसरे तिष्ठस्यय्यनुदारे ॥
सतीरक्षणदुर्वारे ।
मा मा मुञ्च मुरारे ॥ ३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri

गोपीगीतम् ।

कोऽपि न यात्यायाति, सखि री !
श्यामसुन्दरो गतो यतस्तद्-वृत्तं नैव ददाति ॥
युगमिव दिनं कल्प इव रात्रिस्तद्विरहे प्रतिभाति ।
अशनं वसनं रसनं हसनं विषमिव व्यसनं राति ॥
कृष्णभुजङ्गो भुजगीं कुब्जामाश्लिष्यति न जहाति ।
प्रेमामृतं पिबति मुह्यति तन्मोदस्तनौ न माति ॥
तप्ततैलमिव वर्षति मघवा वायुर्विकलो वाति ।
"श्रीकर,, कोऽपि न मथुरां गत्वा व्रजतन्तापं ख्याति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

गोपीगीतम् ।

राधिकावर ! किं पुनः कुञ्जे विहरिष्यसि ।
एकदाऽऽगत्येह नः सुखिता न करिष्यसि ॥
विप्रलब्धा नो वयं सुखमधिगच्छामः ।
नयनयोर्नः किंकरीणां किन्न चरिष्यसि ॥
चित्रपट इव मानसे खचितां निजमूर्तिम् ।
दर्शयिष्यसि, गोकुले किन्नावतरिष्यसि ॥
विस्मरामो नो वयं क्षणमपि तव कृत्यम् ।
नः स्मरिष्यसि किं पुनर्हृदये न धरिष्यसि ॥
दग्धमिव विरहेण ते रमणस्थलमेतत् ।
सिञ्चितुं स्वकृपाम्बुभिः "श्रीकर,, न सरिष्यसि ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

हिन्दोला

माधव ! मन्दमन्दमान्दोलय,
जनयति भीतिं हिन्दोला ।
निम्नोन्नता रतेरुपदिशती
रीतिं हिन्दोला ॥ माधव० ॥
वायुर्वहति नयति मानसिकीं
प्रीतिं हिन्दोला ॥ माधव० ॥
वर्षति मघवा कर्षति नृपते-
र्नीतिं हिन्दोला ॥ माधव० ॥
गायं गायं श्रावय "श्रीकर,,
गीतिं हिन्दोला ॥ माधव० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri

शिवपञ्चकम्

न जाने ते पूजां शिव शिव ! न जाने जपमहो,
न जाने ते मन्त्रं स्तुतिमपि न जाने तव कथाम् ।
परं जाने शम्भो ! त्वमसि करुणाया जलनिधि—
र्निगूढो, मूढोऽहं शरणमिति वे शंदमगमम् ॥ १ ॥

जनानामुद्धर्ता निरयपतितानां गतधियां,
प्रसिद्धस्त्वं शम्भोऽहमपि पतितः पाहि पतितम् ।
विचारश्चेदित्थं तव सुकृतिनामग्रि पदनः,
तदा त्याज्या दूरे हर हर हरेति स्वपदवी ॥ २ ॥

अनाधीतः सम्यक् पुरहर ! न ते पावनकरीं,
कथां वक्तुं शक्तस्तदपि मनसा वेद्मि शुभदाम् ।
मनोनैर्मल्यं वै वदति ननु सत्यं परगतं,
विधेयं तद्यत्ते मनसि मयि संप्राप्तशरणे ॥ ३ ॥

न काङ्क्षेऽहं लक्ष्मीं न च सुकवितां, नैव रमणीं,
भवेद्या त्वन्मार्गं व्रजति मयि संविघ्ननिरता ।
कदा शान्त्यासीनः शिव शिव शिवेति प्रणिगदं...
स्तनावाप्स्याम्यस्मिन् त्रिपुरहर ! निर्वाणपदवीम् ॥ ४ ॥

विपाकं पापानां जगति विपरीतं जनयितुं,
शिवो यः पर्याप्तः परममहिमा तस्य जयतात् ।
विनम्रा याच्ञेयं त्रिपुरहर ! ते पंकजपदे,
ज नानामानन्दं जनयतु कृतिः श्रीकरकवेः ॥ ५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

एकं पत्रम्

(१९९७ विक्रमाब्दे आश्विनमासस्य जयपुरीय—संस्कृतरत्नाकरमासिकपत्रे परमादरणीयमहामहोपाध्याय पं० गिरिधरशर्मचतुर्वेदमहाभागानामस्मत्कृते प्रकाशितमासीत् "अनावृतं पत्रम्' सार्द्धाष्टपृष्ठेषु । तदुत्तरे पत्रमेतद् गतमासीत्तदन्तिके । संस्कृते प्रकाशितमपि काव्याः सन्देशनामके संस्कृतमासिकपत्रे 'ऐतिहासिकं पत्रम्" इति शीर्षकेण सकथमुद्धृतमासीदिति पत्रमेतदन्येषामपि हिताय भविष्यतीत्यत्र प्रकाश्यते ।)

यस्योत्साहमनन्तं दृष्ट्वा मुह्यन्ति सूरयो धर्मे
वन्दे विद्यागारं विख्यातं गिरिधराचार्यम् ॥

रत्नाकरेऽनावृतपत्रमथ,
प्रकाशितं प्राप्तमपाठि सर्वम् ।
भवत्प्रतिष्ठानुगुणं तदेत—
च्चेतस्यतो हर्षमलं तनोति ॥

ममापराधैः कलुषीभवद्भिर्
लेखो भवद्भिः प्रहितो न कश्चित्
परं महापण्डित ! संस्कृतैः कः
कृतोऽपराधो भवतां न जाने ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Digitized by: Tattva Heritage Foundation. Digitization: eGangotri

मदीयपत्रे तु विरोधिनामपि,
भवन्ति लेखा बहुधा प्रकाशिताः।
महाजनानां भवतां कृते तदा,
कथञ्च सुस्थानसुरक्षणं भवेत्॥

विरोधिनो यद्यपि सन्ति साम्प्रतं
स्फुरत्प्रभा जैपुरपण्डिता मम।
परं स कालः सहसा समागतो
यदा भविष्यन्त्यनुचारिणोऽपि ते॥

वदामि हिन्दीञ्च पठामि हिन्दीं
लिखामि हिन्दीञ्च प्रचारयामि।
न कामये भारतराष्ट्रभाषा-
पदेऽपि तां किन्त्विति मे विवादः॥

अधोगता संस्कृतभारतीयम्
पुरातनी भारतराष्ट्रभाषा।
समादृता पूर्वजनैः प्रकामं,
विसर्जनीया किमु भूमिदेवैः॥

द्विषन्ति मूर्खा यदि संस्कृतं त-
न्न तेन हानिर्मम काचिदस्ति।
भवादृशां किन्तु विरोध एष
तुदत्यलं मानसमम्बु नूनम्॥

CC-0. Bhagavan Mahaveer Jain Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

महापराधा विहिताः कदाचि—
न्मया ऽपि चेत् साधुधियैव केचित् ।
मनीषिभिस्तत्रभवद्भिरेते,
न किं क्षमार्हा वत संस्कृताय ॥

अमापराधे कुपितैर्भवद्भि-
र्विसृज्यते संस्कृतभारतीयम् ।
कथं पुना राष्ट्रगवीत्वमस्याः,
सभासु न स्वीक्रियते कदाचित् ॥

न राष्ट्रभाषा यदि जायतेऽद्य,
तदा शनैः शान्तिमुपैष्यतीयम् ।
शमं गता नेष्यति धर्ममेनं
सनातनं हन्त ! रसातलेऽलम् ॥

नष्टे स्वधर्मे विपुलाः प्रजास्ताः
वैरञ्चलिष्यन्ति विनाशमाप्तुम् ।
विनाशमाप्ता जगदन्तमूलं,
प्रस्थापयिष्यन्ति च भूमिदेवान् ॥

कलङ्कितो ब्राह्मणवर्ग एषः,
कथं शिरःप्रोन्नयने प्रभुः स्यात् ?
स्वधर्मगुप्तिक्रियया विहीनः
कथं विमुक्तश्च भविष्यतीतः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

वयं विमुक्ता यदि नैव साम्प्रतं,
तदा न मुक्तिः सुलभा भविष्यति ।
न किं पुराणे पठितं, सुदुर्लभं,
विमुक्तिमूलं मनुजत्वमेव हि ॥

कुरङ्ग-मातङ्ग-पतङ्ग-भृङ्ग-
मीनादियोनौ यदि जन्म जातम् ।
मनुष्यता हन्त ! हताऽस्मदीया,
किं वक्ष्यतीत्यध्यधि चिन्तनीयम् ॥

विपत्पयोधौ पतनं न योग्यं,
सन्त्यज्य सत्संस्कृतपादमूलम् ।
विधेयमित्थं शुभकर्म दैवी,
गीर्जायतां भारतराष्ट्रभाषा ॥

भुवः सुराः संस्कृतरक्षकाः स्युः,
श्रुतं श्रुतीनामिति नो वचः किम् ।
"विद्या ह वै ब्राह्मणमाजगाम,
गोपाय मां शेवधिरस्मि तेऽहम्" ॥

दुरन्तवीर्यैर्बहुधा प्रधर्षिता ऽऽ—
तताथिभिः सातिशयं विमर्दिता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

प्रमादिभिर्निन्द्यवचोऽवहेलिता
न हि ऽपापात्रमयापि भारती ॥

समागतोऽयं समयोऽनुकूलः,
उपेक्षणीयो न कदापि विद्भिः ।
वदन्ति सर्वेऽपि विदः सगर्वं,
स्वराष्ट्रभाषा किल संस्कृतं स्यात् ॥

मौहम्मदांग्रेजयहूदिनः पा-
रसीकबौद्धार्हतसिक्खवर्गाः
अनेकप्रान्तीयगवीविदश्चा-
द्यान्दोलने सम्मिलिता भवन्ति ॥

भवन्ति चेन्नोत्तरभारतीया,
आन्दोलनेऽस्मिन्मिलिता वराकाः ।
हिन्दीविदस्तद्विनिपातनाय,
प्रकाशिता ऽभून्मम शारदा ❀ऽलम् ॥

सुदुर्बला हिन्दिविदः स्वयं ततः,
परस्परं योद्धुमनारतं रताः ।
अथाप्यशक्ताश्चपला वहिर्मुखाः,
कदापि सोढुं सुरभारतीविदः ॥

❀शारदानाम्नी हिन्दिमासिकपत्रिका प्रकाशिता या चतुर्वर्षपर्यन्तं चलिताऽपि सरकारेण कागजमदत्वाऽवरोधितेति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

महासभाऽप्यस्तमुपागतेव,
न शोभते हिन्दुसभापि तद्वत् ।
विधर्मिणः सन्ति सुवारकास्ते,
महाजमैरद्य तिरस्कृताश्च ॥

कदाचिदस्मिन् समये मदीय-
मान्दोलनं स्याच्चलितं सुयुक्त्या ।
तदाशु सम्भाव्यत एव कश्चि-
त्लाभः परश्चेति वितर्कयामि ॥

अतो न नेयः समयो भवद्भि-
र्विवाद एवेह निवेदयामि ।
ब्राह्म्या हितं साधयतेति याचे,
कालीप्रसादो भवतां रुजार्तः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

साप्ताहिकसंस्कृतस्योपहारांकः
मणिमुक्त संख्या ११

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.